International Journal of Trend in Scientific Research and Development (IJTSRD)
Volume 7 Issue 2, March-April 2023 Available Online: www.ijtsrd.com e-ISSN: 2456 – 6470

# गोविन्दभाष्ये जैन-पाशुपत-शक्तिवादनिरसनं तथा श्रीहरितत्त्वप्रतिपादनञ्च

**Manabendra Mandal**

Ph.D (Advaita Vedanta), National Sanskrit University, Tirupati, Andhra Pradesh, India

***How to cite this paper***: Manabendra Mandal "In the Commentary on Govinda, the Refutation of the Jain-Pashupata-Shakti-Vada and the Presentation of the Sri Hari Tattva" Published in International Journal of Trend in Scientific Research and Development (ijtsrd), ISSN: 2456-6470, Volume-7 | Issue-2, April 2023, pp.293-295, URL: www.ijtsrd.com/papers/ijtsrd54005.pdf

IJTSRD54005

Copyright © 2023 by author (s) and International Journal of Trend in Scientific Research and Development Journal. This is an Open Access article distributed under the terms of the Creative Commons Attribution License (CC BY 4.0) (http://creativecommons.org/licenses/by/4.0)

जैनाः वदन्ति पदार्थः द्विविधः जीवः अजीवश्च। तत्र जीवः शरीरात्मकः, अजीवः धर्माधर्मपुद्गलकालाकाशाः चेति। गत्यात्मकः धर्मः स्थितिहेतुरधर्मः इति। अत्र अधर्मः व्यापकः। वर्णगन्धरसस्पर्शयुक्ताः पुद्गलाः, तच्च परमाणुरूपं संघातरूपं चेति द्विविधः। पृथिव्यादिभूतानि संघातः। एकः परमाणुः। पृथ्वी विशेषवस्तु। अतीतादिव्यवहारहेतुः अणुरूपः कालः। आकाशः एकः अनन्तः। द्रव्याणि षट्। जगदिदं द्रव्यम्। तत्र पञ्चास्तिकायः ख्यातः। अस्तिकायः इति पदस्यार्थः भवति व्यापकदेशवर्ती द्रव्यर्हा। ते यथा जीवीस्तिकायः, धर्मास्तिकायः, अधर्मास्तिकायः, पुद्गलास्तिकायः, आकाशास्तिकायः इत्येताः पञ्चधा। जैनानां मते पदार्थाः सप्त, जीवाजीवास्रवसम्बरनिर्जरबन्धमोक्षश्चेति। ज्ञानगुणयुक्तः जीवः। जीवस्य भोग्यः अजीवः। इन्द्रियसमूहः आस्रवः। इन्द्रियसमूहोपरि आवरकः अविवेकः सम्बरः। येन कामक्रोधादिः जीर्णः भवति सः निर्जरः। कर्म्मानुसारेण आपादितः जन्ममरणप्रवाहः बन्धः। उक्ताष्टसु कर्मसु चत्वारि अनिष्टं जनयन्ति, अन्यानि चत्वारि इष्टं सम्पादयन्ति। शास्त्रैः अष्टकर्मभ्यः विमुक्तिः आत्मलाभः इत्युच्यते। सम्यक् ज्ञानं दर्शनं चरित्रं चेति त्रयः त्रिरत्नः उच्यते यानि मुक्तिसाधनानि इति उच्यन्ते। पदार्थसंस्थानार्थं सप्तभङ्गीन्यायः जैनैः विश्लेषितम्। तद्यथा- स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यः, स्यादस्ति च नास्ति च, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति च नास्ति चावक्तव्यः इति। सप्तभङ्गानां समवायः यस्मिन् सा सप्तभङ्गी, अत्र सप्तसु विभागेषु प्रयुक्तः स्यात् शब्दः अवयववाच्यार्थे प्रयुक्तः। प्रसङ्गेऽस्मिन् वादीनां पदार्थभेदविषयकसप्तनियमाः भवन्ति। तेषां नियमानां भङ्गार्थं सप्तभङ्गीन्यायः वर्तते। धर्मसमूहानाम् अनैकान्तकत्वात् सप्तभङ्गीन्यायः स्वीकर्तव्यः एव। वस्तुनि ऐकान्तिकतया भवन्ति चेत् सर्वदा सर्वत्र सर्वप्रकारतया भवितारः। तस्य कथमपि निवृत्तिः कुत्रापि न सम्भवति। अनैकान्तिकपक्षे तु भिन्नं विपरीतम् अस्ति। अतः सर्वाणि द्रव्याणि नित्यपर्यायात्मकानि भवन्ति। अवस्थाभेदेन भावात्मकाभावात्मकाः सत्त्वासत्त्वविशेषेण पदार्थाः उत्पत्स्यन्ति। प्रमाणितं सत्त्वासत्त्वम् उभयसङ्गतम्। अग्रे संशयः एवं जायते यत् आर्हतोक्तः जीवादिपदार्थसमूहः किं युक्तः अयुक्तः वेति। पूर्वपक्षिभिः उच्यते सप्तभङ्गीन्यायेन सर्वं साधितम् तस्मात् युक्तः इति प्राप्ते आहः-

**सूत्रम्- नैकस्मिन्नसम्भवात्।।३३।।**
सप्तभङ्गीन्यायेन एकस्मिन् वस्तुनि युगपत् विरूद्धधर्माणां समावेशः न युक्तः। एकस्मिन् समये एकस्मिन् वस्तुनि शीतलम् औष्ण्यं च नान्तर्भवति। एवमेव धर्माधर्मौ सत्त्वासत्त्वौ स्वर्गनरकौ मिश्रितः चेत् साधनविधिः व्यर्थः स्यात्, मिश्रितः चेत् उदकार्थी अग्नौ गृहार्थी वायौ प्रवृत्तः स्यात्, एतन्न युक्तम्। अभेदास्तित्वप्रयुक्तप्रवृत्तिः आवश्यकी भवति। विशेषतः निर्धार्य्य सर्वे पदार्थाः, निर्धारसाधनभङ्गसमूहः, निर्धारकजीवः किञ्च निर्द्धारणं फलम् इत्येताः सप्तभङ्गीन्यायेन अनैकान्तिकाः भवन्ति। अतः सप्तभङ्गीन्यायः पदार्थादीनां प्रमाणत्वेन अयुक्तः इति सिद्धम्। एवमेव क्रमशः चतुर्णां बौद्धानाम् अन्ते जैनानां युक्तिभिः प्रमाणैः खण्डनं कृतमिति सिद्धं वर्तते।

अग्रे आत्मनः देहपरिणामत्वविषये उच्यते।

**सूत्रम्- एवं चात्माकार्त्स्न्यम्।।३४।।**
एकस्मिन् वस्तुनि विरुद्धधर्माणां समावेशः न भवति। समावेशः स्यात् चेत् आत्मन्यपि अकार्त्स्न्यादिदोषयुतः स्यात्। शरीरात्मकः जीवः इति भवति। परन्तु जीवात्मकम् शरीरम् इति वक्तुं नार्हति। यदि जीवात्मकं शरीरं तर्हि कर्मवशात् तत्तत् योनिप्राप्तिः न भवति। गजशरीरस्य सर्वांशे जीवत्वं तिष्ठति एवञ्च मशकस्यापि सर्वस्मिन् शरीरांशे जीवः तिष्ठति। अतः शरीरात्मकः जीवः इति सिद्धं वर्तते।

**सूत्रम्- न चपर्यायादप्यविरोधो विकारादिभ्यः।।३५।।**
अधुना शैशवस्थशिशोः अथवा युवकस्य शरीरस्थकोशावयवादिकं दृष्टा तादृशावयवस्य स्वीकारः अथवा हस्त्यश्वादौ तत्तद्गतशरीरस्थान् अवयवान् दृष्ट्वा देहमरिमतत्वसामञ्जस्यम न युक्तम्। युक्तश्चेत् परिवर्तनम् अपरिहार्यम् इति निःसन्दिग्धम्। एवमस्ति चेत् जीवस्य परिवर्तनशीलस्य अनित्यत्वात् कृतहानिः अनिवार्यः भवति। परन्तु जीवः नित्यः, अत्र परिवर्तनं न भवति इति उक्तिः अपि असङ्गता वर्तते। यतोहि आयतनम् शरीरम् अजन्यत्त्व-सत्त्व-असत्त्वादिविकल्पाद् अनित्यम् इति।

अधुना जैनानां मतखणडनं क्रियते-

**सूत्रम्- अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात्।।३६।।**
जैनानां मते संसारः मोक्षश्च समानं नित्यम्। एकस्मिन् विशिष्टं वर्तते इति न। जीवस्य उर्ध्वगति मुक्तिः इति। मुक्तिः उर्ध्वगतिप्राप्त्या अथवा आकाशावस्थाप्राप्त्या भवति। संशयः भवितुमर्हति उर्ध्वगतिप्राप्तिद्वारा अथवा निराश्रयाकाशप्राप्तिद्वारा सुखं भवति वेति। यतो आकाशः उर्ध्वगतिः वा नि नित्यम् अतः तत्र गत्वा सुखं लभते इति कथं वक्तुं शक्यते। अतः सदसद्विलक्षणं किञ्च उपनिषद्प्रतिपाद्यं ब्रह्मैव वस्तु इति अवाच्य विरुद्धमतम् एवनमेव

मायावादीनां खण्डनपूर्वकं जैनमतं निरस्तमिति सिद्धम्। अधुना पाशुपतमतखण्डनं क्रियते।

पाशुपतसम्प्रदायस्य अन्यानि नामानि भवन्ति शैवसम्प्रदायः, गाणपत्यसम्प्रदयः, सौरसम्प्रदायः चेति। जीवानां पाशविमोचनार्थं पशुपतिना उपदिष्टं मतं पाशुपतनाम्ना प्रसिद्धा वर्तते। पाशुपतादिनां मते कारण-कार्य-योग-विधि-दुःखान्तः च पञ्चपदार्थाः भवन्ति। एतेषां मते पशुपतिः एकमात्र ईश्वरः तद्भिन्नम् अन्यत् सर्वं कार्यम्। दुःखान्तः मोक्षः, औंकारजपः योगः, त्रैकालिकस्नानादिः विधिः। तथैव नामान्तरेषु सौरसम्प्रदायस्य उपास्यः सूर्यः, गाणपतसम्प्रदायस्य उपास्यः गणपतिः अतः उभयत्र सूर्यः, गणपतिश्च कारणम्। तत्तत् देवानां उपासनया परमेश्वरप्राप्तिः श्रुयते। अधुना शङ्का जायते किं पाशुपतसाम्प्रदायिकमतं युक्तं न वेति। उक्तकारणात् मोक्षसिद्धिः अतः युक्तमिति प्राप्ते पूर्वपक्षे सिद्धान्तमाहः-

**सूत्रम्- पत्युरसामञ्जस्यात्।।३७।।**
अवैदिकत्वात् पाशुपतमतवादः अयुक्तः। वेदे केवलं नारायणस्य सर्वकारीयत्वम् उक्तम् अन्येषां देवतानां कार्यकरीत्वेन निर्देशतम् अतः अवैदिकमिति। भगवता नारायणेन यदुक्तम् तत् भेषजम् वैदिकञ्च। सृष्टिप्रक्रियायाः स्थित्याः ध्वंसस्य च नियन्त्रकः अयं भगवान् नारायणः। अथर्ववेदे उच्यते- **तदाहुरेक ह वै नारायण आसीन्न ब्रह्मा न ईशानो नापो अग्निसोमौ नेमे द्यावापृथिवी नक्षत्राणि न सूर्यः स एकाकी न रमते, तस्य ध्यानान्तस्थस्य यत्र स्तोममुच्यते तस्मिन् पुरुषाश्चतुर्दश जायन्ते। एका कन्या, दशेन्द्रियाणि मन एकादशं तेजो द्वादशमहंकारस्त्रयोदशः प्राणश्चतुर्द्दश आत्मा पञ्चदशबुद्धिः पञ्चतन्मात्राणि पञ्चभूतानि** इति। किञ्च **अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेय, नारायणाद् ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणात् प्रजापतिः प्रजायते नारायणादिन्द्रो जायते नारायणादष्टौ वसवो जायन्ते नारायणादेकादशरुद्रा जायन्ते नारायणाद्वादशादित्या जायन्ते** इति। एवञ्च उच्यते- **अहमेव स्वयमिदं वदामि जुष्टं**

**देवेभिरुत मानुषेभिः। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां। अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ। अहं जनाय समदं कृणोमि अहं द्यावा पृथिवी आविवेश** इति। अन्याः श्रुतयः अपि सन्ति याभिः नारायणस्यैव उत्कृष्टत्वं कर्तृत्वं नियन्त्रकत्वम् उक्तम्। यथा- **तमेतं वेदानुवचनेन(यजुर्वेदे)............., विज्ञाय प्रज्ञां कुर्वीत............, आत्मा वाऽरे द्रष्टव्यः** इत्यादयः। स्मृतिष्वपि तथैव गीयते। अतः पाशुपतादीनाम् उक्त देवता पशुपतिः न भिन्नः कोऽपि सः नारायणः एव। सर्वकर्तृत्व नियन्तृत्व सर्वज्ञत्व केवलं वेदे नारायणस्यैव प्रतिपादितम्। तस्मात् तत्र वर्णितदेवता पशुपतिः नारायणः एव। ब्रह्मरूद्रादीनां तात्पर्यं नारायणे एव। तद्भिन्नं सर्वं कार्यरूपम्।

अग्रे अवैदिकसिद्धान्तानां दोषाः के इति दर्शयन्ति। ये अवैदिकाः भवन्ति ते कल्पनामात्रम् अनुमानमात्रम् ईश्वरः, न प्रत्यक्षरूपः इति वदति। परन्तु एवमुच्यते चेत् आस्तिकदर्शनस्य हानिः भविता, तस्य कल्पनामात्रस्य प्रमाणैः खण्डनमपि कृतं वर्तते। तदग्रे वक्ष्यते-

**सूत्रम्- सम्बन्धानुपपत्तेश्च।।३८।।**
घटाद्युत्पन्नार्थं कुलालः कारणं भवति, सः तु देहविशिष्टः। अतः शरीरविशिष्टः जीवः घटादिकार्यस्य कर्ता भवति। अस्य प्रपञ्चस्य उत्पत्त्यर्थमपि कञ्चनकारणं भवेत् तच्च शरीरावयवविशिष्टं भवेत्। अशरीरेण सह कारणस्य कोऽपि सम्बन्धः नास्ति।

**सूत्रम्- अधिष्ठानानुपपत्तेश्च।।३९।।**
कुलालः घटादिकार्यं पृथिव्यां स्थित्वा एव सम्पादयति। कार्यस्य कञ्चन अधिष्ठानं भवेत्। लोकेऽपि सर्वेषां कार्याणां कारणम् अधिष्ठानं च अवश्यं भवति। कदाचित् शङ्का भवितुमर्हति यत् शरीराभावात् ईश्वरस्य जगत्कारणोनुपपत्तिः स्यात्। तस्मात् ईश्वरः अधिष्ठानं नार्हति शक्तुम्।

संशयः जायते यत् शरीरविहीनस्य जीवस्य शरीरम् इन्द्रियाणि च यथा कर्ता भवति तथैव ईश्वरोऽपि अधिष्ठानम् इति प्राप्ते पूर्वपक्षे आहः-

**सूत्रम्- कारणवच्चेन्न भोगादिभ्यः।।४०।।**
प्रलयकाले क्रियासाधनम् अधिष्ठानम् इति धिया ईश्वरः जगत्सृजति। परन्तु एवमुच्यते चेत् भोगापवादः ईश्वरे आपतति। जन्म-लयः कारयतीति उच्यते चेत् सुखदुःखभोगापवर्गः ईश्वरस्य धर्मः इति वक्तव्यम् तदा अनीश्वरत्वम् आयाति।

पूर्वपक्षिभिः आक्षिप्यते यथा लोके राजा राज्याधीशः भवति अन्ये सर्वे प्रजाः भवन्ति, राज्ञा प्रजाः पाल्यन्ते। तथैव राजावत् कश्चन शरीरविशिष्टः ईश्वरः इति कल्प्यताम् इति चेत् सिद्धान्तमाहः-

**सूत्रम्- अन्तवत्त्वमसर्व्वज्ञता वा।।४१।।**
पुर्वक्तों यत् तत् सिषाधयति चेत् प्राज्ञवत् ईश्वरस्यापि आसार्वज्यत्वम् आयास्यति। ईश्वरस्य सर्वज्ञत्वं नास्ति चेत् अनवस्था प्रसङ्गः, यच्च अनर्थाय। ब्रह्मकर्तृत्ववादेऽपि दोषः आपतति इति न, तत्र श्रुतिमूलकत्वं वर्तते इत्यतः दोषः न ग्रहीतव्यः। ब्रह्मसूत्रे **श्रुतेस्तु शब्दमूलत्वात्** इत्यस्मिन् सूत्रे ब्रह्मणः श्रतिमूलकत्वम् उक्तम्। एतेन प्रजापत्याद्यनेकेषां स्वातन्त्र्यं निरस्तम्। तार्किकानां पाशुपतादिनां वा निराकर्तुं पञ्चसूत्रावतारणा इति मन्तव्या।

अधुना शक्तिवादं दूषयितुं प्रयतते। शाक्तानां मतानुसारे सार्वज्ञ्यादिगुणविशिष्टशक्तिः जगत्स्रष्टा। शक्तिः विशिष्टगुणः इति बहुत्र शास्त्रे प्रतिपादितं विद्यते, तस्मात् शक्तेः सर्वं कार्यम् उत्पद्यतेति प्राप्ते पूर्वपक्षे सिद्धान्तमाहः-

**सूत्रम्- उत्पत्त्यसम्भवात्।।४२।।**
अत्रापि वेदविरुद्धानुमानेन शक्तेः अस्तित्वं सर्वज्ञत्वं च साधितम्। शक्तिः जनयित्री कर्त्री

इति, परन्तु पूर्वसूत्रे एतस्याः सर्वज्ञत्वं निराकृतं वर्तते। एकस्याः शक्तेः समेषां सृष्टिः अथवा एकस्मात् गुणात् समेषां सृष्टिः इति

वक्तुं न शक्यते। विना पुरुषसंसर्गात् स्त्र्याः यथा अपत्यं न जायते तथैव अत्रापि ग्रहणीयम्।

शक्तेः अनुग्रहकर्ता पुरुषः, ततः अनुगृहीता शक्तिः इत्येवमुच्यते चेदपि दोषविमुक्तिः न जायते। अतः आहः-

**सूत्रम्- न च कर्तुः करणम्।।४३।।**
यदि पुरुषः शक्तेः कृते अनुग्रहकारी तर्हि तदिप न युज्यते, पुरुषस्य देहेन्द्रियादिकरणाभावात्। पुनः यदि देहेन्द्रियस्वीक्रियते तर्हि पूर्वोक्तदोषाः आपतन्ति।

यदि पुरुषः नित्यः गुणविशिष्टः इति, तर्हि उच्यते-

**सूत्रम्- विज्ञानादिभावे वा तदप्रतिषेधः।।४४।।**
पुरुषः नित्यगुणशाली इति उच्यते चेत् ब्रह्मवादान्तर्गतः भविता। यतो हि तत्रापि पुरुषः विश्वस्य कर्ता स्रष्टा इत्युक्तम्।

मोक्षार्थं शक्तिमात्रमेव कारणम् इति वक्तुं न अलं प्रतिभाति। एवमुक्त्वा उपसंहरति,-

**सूत्रम्- विप्रतिषेधाच्च।।४५।।**
श्रुतिस्मृतियुक्तिभिः ईश्वरस्य परत्वं निर्दिश्यते, तद्विरुद्धः शक्तिवादः न युक्तः इति **च** शब्देन दृढयति। अतः कण्टकपरिमितसाङ्ख्यदर्शनमार्गं परित्यज्य वेदान्तमार्गानुसारिण्यः भवेयुः।

**निष्कर्षः-**
माध्वसम्प्रदायिनः वदन्ति यत् परब्रह्म स्वतन्त्रं, जीवजगतादिः तस्याधीने तिष्ठत्यतः पृथगिति, तस्मादेते आत्यन्तिकभेदवादं न समर्थयन्ति। वैष्णवाचार्याः नात्यन्तिकभेदवादीनः अपितु भेदाभेदवादी। ब्रह्मप्रमातिरिक्तं किमपि तत्त्वं नास्ति एवञ्च जीवजगतादयः परब्रह्मणः प्रकाशमात्रमिति। पुनरेते ब्रह्मणा सह प्रपञ्चस्य भेदमपि स्वीकुर्वन्त्यतः भेदाभेदवादीरित्युच्यते।

भास्कराचार्यप्रतिपादितौपचारिकभेदाभेदमपि न, ब्रह्मणा सह उपाधिसंयोगकल्पना-

भावात्।

निम्बार्काचार्यप्रणीतस्वाभाविकभेदाभेदवादवन्न, प्रपञ्चस्य दोषसमूहस्य ब्रह्मणः स्वाभावि-कदोषाकथनात्।

आचार्याणां मते जीवजगत्समुदायः परब्रह्मणः शक्तिः। ब्रह्मणा सह स्वशक्तेः युगपद्भेदाभेदसम्बन्धः विद्यते। भेदाभेदस्य युगपदवस्थानं युक्तितर्कागोचरत्वेऽपि श्रुतार्थापत्त्या सहावस्थानं स्वीकरणीयम्। एतत् भेदाभेदवादमेव अचिन्त्यभेदाभेदवादमित्युच्यते। एते वदन्ति सात्विकाच्छ्कृष्णः, राजसात् ब्रह्मणः, तमसाच्छिवस्योत्पत्त्यतः ब्रह्मापेक्षया श्रीहरिः अर्थात् श्रीकृष्णः श्रेष्ठेति। श्रीहरिः अथवा श्रीकृष्णप्राप्तये भक्तिः एकः पन्था। परमानन्दप्राप्तिः मोक्षकामीताऽपि यस्मिन् वर्तते सैव भक्तिमार्गे गन्तुं शक्नोति। उत्तमाभक्तिलक्षणं रूपगोस्वामिना उक्तम्,-

**अन्त्याभिलाषिताशून्यं ज्ञानकमद्यिनावृतम्।**
**आनुकूल्येन कृष्णनुशीलनं भक्तिरूत्तमा।।**

भक्तिमार्गेण गम्यते चेत् मोक्षः जायते। महाभारते श्रीहरिदर्शनेन श्रीकृष्णदर्शनेन वा मुक्तिः जातेति श्रुयते।

- **.ग्रन्थः/ग्रन्थकर्ता/सम्पादकः/व्याख्याकारः/प्रकाशनसंस्था/वर्षः-**


- वेदान्तदर्शनम्- स्वामी विश्वरूपानन्दः, स्वामी चिद्घनानन्द पुरी, उद्बोधनकार्यालयः, सेप्टेम्बर, २०१४।
- श्रीचैतन्यचरितामृतम्- गीताप्रेस
- ब्रह्मसूत्रगोविन्दभाष्यम्- बलदेवः